ॐ

गुरुप्रशस्तिः

प्रणेता—

हंसराजः नागरः

एम० ए०।

सर्वाधिकाराः सुरक्षिताः ।

प्रथमम् संस्करणम्—5 सि० 1986

प्राप्तिस्थानम्
हंसराजः नागरः
ग्रामः — तिगांवः 121101
उपमण्डलम् — बल्लभगढ़म्
मण्डलम् — फरीदाबादम् ।
(हरियाणा)

मूल्यम् रुप्यकत्रयम् 3-00

मुद्रक : बादशाह प्रिंटिंग प्रैस
सिही गेट, बल्लबगढ़ ।

ॐ

गुरुप्रशस्तिः

प्रणेता—

हंसराजः नागरः

एम० ए०।

ॐ

गुरुप्रशस्तिः

देहि प्रशस्तबुद्धिं मे गुणोपेतां जगत्पते ।
नारायण ! गुरोर्दिव्यान् गुणान् यया वदान्यहम् ॥1॥

पूजनीयो गुरुर्देवः श्रद्धास्पदं च सर्वदा ।
मानयन्ति जनाः सर्वं उच्चतमं हि तत्पदम् ॥2॥

संसारेऽस्मिन् गुरूर्देवः सर्वैर्गुणैरलंकृतः ।
इच्छति योऽपि यत्किञ्चिद् ददाति तच्च सोऽनघः ॥3॥

गुरोः स्मरणमात्रेण तमोमूलं विनश्यति ।
जायते ब्रह्मबोधो वै परानन्दकरो हृदि ॥4॥

वन्दनीयो गुरुर्देवस्त्रिषु लोकेषु दीपकः ।
कलियुगे सुधातुल्य आकरो ज्ञानसम्पदाम् ॥5॥

पञ्चभूतमयो देहः शव एव विना मतिम् ।
ज्ञानज्योतिःसमापन्नः चेतनः कृपया गुरोः ॥6॥

जनः कोऽपि न संसारे तरति भवसागरम् ।
गुरुज्ञानं विना सम्यग् गुरुज्ञानं सुधाऽमलं ॥7॥

सुखानि स्वर्गभोग्यानि जीवः स लभते सदा ।
चरणयोर्गुरोः स्थित्वा श्रद्धया यश्च सेवते ॥8॥

सम्मानं गुरवो यान्तु नित्यं भवन्तु पूजिताः ।
जयन्तु ते च सर्वत्र त्रिषु कालेषु भूतले ।।9।।

जन्मभूमिश्च सर्वेषां गुणाना च गुरुस्त्रिषु ।
लोकेषु सर्वपापानां स एव च महौषधम् ।।10।।

गुरोः पार्श्वे वसन् शिष्यो हीरक एव जायते ।
स्वातिजलं यथा मुक्ता संसर्गो ह्यमृतं गुरोः ।।11।।

सुप्रशस्तो गुरुर्दीपो लोका येन प्रकाशिताः ।
अपहरति पापं स पुण्यं वर्धयति प्रभुः ।।12।।

मूल्यं गुरूपदेशस्य जानाति पुरुषो यदा ।
पापं नश्यति तत्काल पुण्यं भवति सुन्दरम् ।।13।।

दु खैर्विनिर्मितं सर्वैरपारभवसागरम् ।
तितीर्षूणां गुरुज्ञानं जलयानमनुत्तमम् ।।14।।

यः स्मरति गुरुज्ञानमहर्निशं पुनः पुनः ।
धनसम्पत्तिपुत्रैः स सुशोभितो भविष्यति ।।15।।

ध्यायेन्नित्यं गुरुज्ञानं प्रातःकाले समुत्थितः ।
यदीच्छति स्वकल्याणमस्मिन् दुःखस्य सागरे ।।16।।

गुरुः प्रभुश्च वर्तेते द्वौ पूज्यौ यदि सम्मुखे।
गुरोः पादान् गमिष्यामि यत्र दृष्टः प्रभुर्मया ॥17॥

सहायको न लोकेऽस्मिन् कश्चिद् रुष्टे गुरौ सति।
प्रभौ रूष्टे गुरुर्बन्धुर्गुरौ रुष्टे न बान्धवाः ॥18॥

शरणं च गुरुं लोके नम्रभावेन यो गतः।
सुखान्यपि हि सर्वाणि प्राप्तानि तेन निश्चितम् ॥19॥

गुरुं यः सेवते शिष्यो दीनभावेन सर्वथा।
सफलं खलु तस्यैव संसारे लघुजीवनम् ॥20॥

गौरिति भारती नाम रुरिति तत्प्रदायकः।
क्षयः पापस्य पुण्यस्य यत्राक्षयः स वै गुरुः ॥2।1

नाशयत्यन्धकारं स इन्द्रियेभ्यो ददाति च।
प्रकाशं येन जीवात्मा सुखं समधिगच्छति ॥22॥

गुरुज्ञानं विना दुःखमज्ञानं तस्य कारणम्।
ज्ञानस्य कारणात् सर्वं सुखं जानन्ति पण्डिताः ॥23॥

गुरुरेव सदा ज्ञानं गुरुरेव सदा श्रुतिः।
गुरुरेव सदा शास्त्रं गुरुरेव सदा सुखम् ॥24॥

गुरुरेव सदा माता, गुरुरेव सदा पिता ।
गुरुरेव सदा भ्राता, गुरुरेव सदा सखा ।।25।।

गुरुरेव सदा विद्या, गुरुरेव सदा धनम् ।
गुरुरेव सदा सत्यं, गुरुरेव सदा प्रभुः ।।26।।

न पीतं येन लोकेऽस्मिन् श्रीगुरुपादजामृतम् ।
धिक् तं मूर्खं न तस्यात्र सफलं मर्त्यजीवनम् ।।27।।

गुरुरेव तपोमूलं, गुरुरेव तपोव्रतम् ।
गुरुरेव शुभं तीर्थं, गुरुरेव महाफलम् ।।28।।

गुरुज्ञानं हि साधिष्ठं, कथितं साधु-कोविदैः ।
वेदाः शास्त्राणि सर्वाणि निष्फलानि गुरुं विना ।।29।।

ज्ञानेन भारती शुद्धा, गात्रं शुद्धं जलेन च ।
तपसा कर्म वै शुद्धं, सर्वशुद्धो गुरुः किल ।।30।।

गुरुर्महोदधिर्ज्ञाने, प्रकाशे च दिवाकरः ।
गुरुर्धर्मेषु धर्मश्च, गुरुज्ञानं परं सुखम् ।।31।।

गुरुर्ददाति वै ज्ञानं गुरुर्हरति मूर्खताम् ।
प्रसाद इष्यते तस्य पापानां च प्रशान्तये ।।32।।

प्रभुर्वसति सर्वत्र त्रैलोक्येऽस्मिन् कणे कणे।
गुरुज्ञानं विना सोऽपि कदाचिद् न हि दृश्यते ॥33॥

लोके भ्राम्यति जीवात्मा गुरुज्ञानं विना न सः।
सुखं विन्दति कुत्रापि न कोऽपि तस्य रक्षकः ॥34॥

सर्वे समाःगुरुर्दृष्टौ लोकेऽस्मिन् ये च मानवाः।
न कश्चिद् नीच उच्चो वा, यतः स आत्मदर्शनः ॥35॥

गुरुदानस्य लोके न, निष्कृति करणाय हे।
वन्धो ! कोऽपि समर्थः स्यात् शतं वर्षाणि जीवितः ॥36॥

पालने सैव वै माता, रक्षणे सैव वै पिता।
शिक्षणे सैव वै मित्रं, त्रिषु लोकेषु विश्रुतम् ॥37॥

कुर्वन्ति संशयं लोकाः, पठित्वा विविधं मतम्।
नष्टं करोति तत्सर्वं, गुरुज्ञानं हि केवलम् ॥38॥

दुःखैर्युक्तश्च लोकोऽयमन्धकारे न सत्पथः।
गुरुरेव स कैवर्तः पारयितुं तमोनिधिम् ॥39॥

समुद्राः मसयः सन्तु, वनानि सन्तु लेखनी।
पृथ्वीभँवतु पत्राणि, को लेखितुं गुरुं क्षमः ॥40॥

ज्ञानानां भवतो देव वृष्टिर्भवतु सर्वतः ।
भवतु मे च जीवात्मा, ज्ञानयुक्तश्च सन्ततम् ।।41।।

गुरुस्ताडयते शिष्यान् पाठयन् करुणामयः ।
यथा प्रजापतिः कुम्भं प्रजापतिसमो गुरुः ।।42।।

ज्ञानहीना जना लोके न हि जानन्ति ते गुरुम् ।
कलुषितं विवेकेन हीनं तेषां च जीवितम् ।।43।।

गुरुज्ञान विना सर्वे पाषाणीसन्ति मानवाः ।
संसर्गाद् बहुमूल्याँश्च स्वर्णं पारसतो यथा ।।44।।

त्रिषु लोकेषु सन्तापाः जीवानां त्रिविधा सदा ।
शांतिमायान्ति ते सर्वे कृपा भवेद् गुरोर्यदा ।।45।।

ब्रह्मज्ञानं गुरोः प्राप्तं दीव्यतीव दिवाकरः ।
तारकाणां प्रकाशश्च शून्यो भवति सम्मुखे ।।46।।

चतुरशीतिलक्षेषु दुःखी भ्राम्यति योनिषु ।
जीवात्मा सततं लोके मुच्यते न गुरुं विना ।।47।।

अज्ञानकारणाल्लोकेऽस्मिन् जायते म्रियते जनः ।
भूयोभूयश्च संसारी, गतिः कुत्र विना गुरुम् ।।48।।

गुरौ कृत्वा च विश्वासं बन्धो ! कुरु तदर्चनम् ।
आशिषं दास्यतेऽमोघां जीवनाय दयानिधिः ।।49।।

विधेहि परितो ह्यस्मान्, वर्षा ज्ञानस्य सर्वदा ।
लोकेऽस्मिन् परलोके च सुखं लभै गुरो यथा ।।50।।

जेष्ठो भ्राता पिता माता सन्मित्रं च गुरुः समाः ।
पूज्या लोके मनुष्याणां पञ्चैते गुरवः स्मृताः ।।51।।

पीयूषेषु च पीयूषं, धनेषु चोत्तमं धनम् ।
ज्ञानिषु च गुणी पूर्णो गुरुर्देवेषु देवता ।।52।।

सर्वेषां मानवानां च मध्ये सुशोभते गुरुः ।
तारागणेषु सर्वेषु गगने चन्द्रमा यथा ।।53।।

सफलं सकलं मे च जीवनमिह भो गुरो ।
तस्माद् मुहुर्मुहुः सम्यग् भवन्तमभिवादये ।।54।।

लोकाः जानन्ति को भेदः प्रभुगुर्वोर्हि निश्चितम् ।
प्रभुः प्रजापतिस्तस्य गुरुर्भवति मर्मविद् ।।55।।

पथप्रदर्शकोऽयं च बालिशानां गुरुः सदा ।
दर्शयति च सन्मार्गं निषेधयत्यसत्पथात् ।।56।।

रूपं गुरुश्चः देवानां सर्वकष्टनिवारकः ।
लोकेऽस्मिन् बहुवारं तं करौ बद्ध्वा नमाम्यहम् ।।57।।

बान्धवाः परिवारेषु ददते सुखसम्पदः ।
ज्ञानरत्नस्य दाता तु गुरुरेव न संशयः ।।58।।

अक्षमोऽस्मि गुणग्रामं बहुजन्मसु लेखितुम् ।
गच्छाम्यहं भवन्तं च शरणमद्य सद्गुरो ! ।।59।।

दिष्ट्या प्रसन्नतां यातः कृपालुर्मम सद्गुरूः ।
तस्य ज्ञानस्य वर्षाभिः पवित्रा मे कृता तनुः ।।60।।

शरणं च भवन्तं वै सम्प्राप्तोऽस्मीह सद्गुरो ।
ज्ञानं दत्वा तु कल्याणं कुरु मम दयानिधे ! ।।61।।

गुरुर्ब्रह्मा गुरुर्विष्णु गुरुर्देवो महेश्वरः ।
गुरुः साक्षात् परं ब्रह्म तस्मै श्रीगुरवे नमः ।।62।।

सर्वे भवन्तु नीरोगाः सर्वे भवन्तु शिक्षिताः ।
सर्वे भवन्तु धर्मिष्ठाः सर्वे भवन्तु मानवाः ।।63।।

इति हंसराजनागरप्रणीता गुरुप्रशस्तिः

।। शुभम् ।।